

# केरलपाठावलिः

# संस्कृतम्

## तृतीयकक्ष्या

अक्कादमिक – संस्कृतविद्यालयानां कृते

**KERALA READER - SANSKRIT**
**STANDARD III**

**For Academic & Sanskrit Schools only**

Government of Kerala
Department of Education
2016

# राष्ट्रगीतम्।

जनगणमन अधिनायक जय हे,
भारतभाग्यविधाता।
पञ्जाब सिन्ध गुजरात मराठा,
द्राविड उत्कल बङ्गा।
विन्ध्य हिमाचल यमुना गङ्गा,
उच्छलजलधितरङ्गा।
तव शुभ नामे जागे,
तव शुभ आशिष माँगे
गाहे तव जय गाथा।
जनगण मङ्गलदायक जय हे,
भारत भाग्यविधाता।
जय हे जय हे जय हे
जय जय जय जय हे

# प्रतिज्ञा

भारतं मम राष्ट्रम्। सर्वे भारतीयाः मे भ्रातरः। अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि। तद्योग्यतां सम्पादयितुं सदा यतिष्ये च। अहं पितरौ गुरूंश्चादरिष्ये,बहुमानयिष्ये च। विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च।

मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम्। राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि।

**State Council of Educational Research and Training (SCERT)**
Poojappura, Thiruvananthapuram 695012, Kerala

*Website* : www.scertkerala.gov.in
*e-mail* : scertkerala@gmail.com
Phone : 0471 - 2341883, Fax : 0471 - 2341869
First Edition : 2014, Reprint : 2016
Typesetting and Layout : SCERT
Printed at : KBPS, Kakkanad, Kochi-30
© Department of Education, Government of Kerala

പ്രിയ കുട്ടികളേ,

ഇഷ്ടത്തോടെ ഭാഷ പഠിക്കാൻ വേണ്ട പാഠഭാഗങ്ങളാണ് പ്രൈമറി പുസ്തകങ്ങളിൽ ഉൾക്കൊള്ളിച്ചിരിക്കുന്നത്– കഥകൾ, സുഭാഷിതങ്ങൾ, വിവരണങ്ങൾ, പാട്ടുകൾ തുടങ്ങിയവയാണ് ഉള്ളടക്കം.

മനോഹരമായ ചിത്രങ്ങളിലൂടെ പുസ്തകത്തെ ആകർഷകമാക്കിയിട്ടുണ്ട്.സംസ്കൃതപഠനം നിങ്ങൾക്ക് വേറിട്ട ഒരനുഭവമാകട്ടെ.


**ഡോ. പി. എ. ഫാത്തിമ**

ഡയറക്ടർ

എസ്.സി.ഇ.ആർ.ടി



## TEXTBOOK DEVELOPMENT COMMITTEE
## SANSKRIT - STD - III

### Participants

1 **V. Vijayan**, Sr.Lecturer, DIET (Rtd) Krishnakripa, Pattambi,Palakkad.
2 **P.G Ajithprasad** , G.H.S.S.Kuzhimathicadu, Kollam.
3 **M.D.Dileep**, G.U.P.S.Karachal, Wayanad.
4 **Ajayakumar.T**, G.U.P.S.Thalavoor ,Kollam.
5 **Sreekumari Amma.M.R**, Principal (Rtd ) T.T.I Chettikulangara

### Artist

1. **Varghese Kalathil**, G.H.S.S, Pallikkunnu, Kannur.
2. **Balakrishnan Achary.P.G**, Lecturer DIET (Rtd), Kottayam

### Subject Expert

1. **Dr.Vijayakumari**,University College,Thiruvananthapuram
2. **N.K.Ramachandran**, DEO (Rtd) Wayanad
3 **Dr.T.D.SuneethiDevi**, Special Officer (Sanskrit), DPI, Jagathy,Thiruvananthapuram

### Advisor


**Prof.R.Vasudevan potti**, Prof.(Rtd), Sivadhamam, **Sreekandeswaram**,Thiruvananthapuram

### Academic Co-Ordinator

**Dr.Kerala Sreemathi.T**, Research Officer(Sanskrit), SCERT.


राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद् - केरलाः

STATE COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING - KERALA




# विषयानुक्रमणिका।



| क्रम संख्या | पाठस्य नाम | पुटसंख्या |
|---|---|---|
| 1 | चन्दिरबिम्बः (बालकविता) | 6 - 9 |
| 2 | मल्लः मातेवः च (चित्रकथा) | 10 - 15 |
| 3 | मम कक्ष्या (सम्भाषणम्) | 16 - 19 |
| 4 | शृणु मम वचनम् (कविता) | 20 - 23 |
| 5 | आपदि मित्रं मित्रम् (कथा) | 24 - 27 |
| 6 | मधुरं गणयामः (संख्या) | 28 - 32 |
| 7 | राष्ट्रपिता (विवरणम्) | 33 - 35 |
| 8 | हे मधुपसखे! (अभिनयगानम्) | 36 - 39 |
| 9 | सुभाषितानि (काव्यम्) | 40 - 42 |
| 10 | मूढः शुनकः (कथा) | 43 - 45 |
| 11 | गीतामृतम् (काव्यम्) | 46 - 48 |
|  | अनुबन्धः - शब्दकोशः | 49 - 56 |

## प्रथमः पाठः

# चन्दिरबिम्बः

सुवर्णमेकं पात्रं विलसति
गगने किं वा स्यात्।
परितः पश्यतु पात्रात् गलिताः
सुवर्णकणिका वा?





सुवर्णपात्रं नहि नहि गगने
चन्दिरबिम्बोऽयम्।
सुवर्णकणिकासदृशो भाति च
तारकनिकरोऽयम्।।

## पठनप्रवर्तनानि

- गीतम् एकैकशः सङ्घशः च आलपतु।
- उदाहरणानुसारं पदानि वदतु - लिखतु।

उदाः सुवर्णपात्रम्।
सुवर्णावसरः।

.................. निमेषः।

.................. कालः।

.................. जयन्ती।


.................. माला।

.................. शोभा।

.................. घटिका।।

❖ उदाहरणानुसारं वाक्यानि वदतु - लिखतु।

उदाः  अयं चन्दिरबिम्बः भवति।




| | | |
|---|---|---|
| .............. | .............. | .............. |
| .............. | .............. | .............. |
| .............. | .............. | .............. |
| .............. | .............. | .............. |
| .............. | .............. | .............. |
| .............. | .............. | .............. |

# अकारान्तपुल्लिङ्गरूपाणि परिचिनोतु

| एषः कः ? | एतौ कौ ? | एते के ? |
|---|---|---|
| बालः | बालौ | बालाः |
| नारकः | नारकौ | नारकाः |
| रामः | रामौ | रामाः |

## किमधिगतम् ?

❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूच्यताम्)* |
|---|---|---|---|---|---|
| 1. | तालसमन्वितम् गीतम् आलपितम्। | | | | |
| 2. | पदानि कथितानि लिखितानि। | | | | |
| 3. | वाक्यानि कथितानि लिखितानि। | | | | |
| 4. | अकारान्तपुल्लिङ्ग-रूपाणि परिचितानि। | | | | |

*

*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*



## द्वितीयः पाठः

# मल्लः मातेवः च




मल्लः मातेवःच वनमार्गेण गच्छति। मार्गमध्ये कमपि भल्लूकं पश्यति।


अये भल्लूकः
कथं रक्षा



मातेवः मित्रं मल्लम् उपेक्ष्य वृक्षम् आरोहति।

निस्सहायः मल्लः मृत इव भूमौ शेते।



भल्लूकः मल्लस्य समीपम् आगत्य जिघ्रति।

मृतशरीरमिति मत्वा भल्लूकः मल्लं त्यक्त्वा गतः।

JT 159-3/Sanskrit - 3



वृक्षात् अवरुह्य मातेवः मल्लं पृच्छति-

भल्लूकः तव कर्णे किं वा अवदत्?

मल्लः उत्तरं वदति-

**तन्मित्रम् आपदि सुखे च समक्रियं यत्।**

## पठनप्रवर्तनानि

❖ पाठभागं पठित्वा समानार्थकपदानि सञ्चित्य वदतु - लिखतु।

१. काननम्

२. सुहृद्

३. पादपः

४. श्रोत्रम्

❖ पाठभागं पठित्वा कथास्तम्भान् क्रमीकरोतु।

- मातेवः वृक्षम् आरोहति।
- भल्लूकः मल्लस्य समीपम् आगच्छति।
- मल्लः भूमौ शेते।
- भल्लूकं पश्यति।
- मल्लः मातेवश्च वनमार्गेण गच्छति।

❖ सूचनानुसारं वाक्यानि पूरयतु।

अनूपः मम मित्रं भवति। मित्रस्य  ग्रामे अस्ति। तस्य गृहे एकः

 अस्ति। मम गृहे   च अस्ति।

### किमधिगतम् ?

❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूच्यताम्)* |
|---|---|---|---|---|---|
| 1. | समानार्थकपदानि लिखितानि। | | | | |
| 2. | कथास्तम्भाः क्रमीकृताः। | | | | |
| 3. | वाक्यपूरणं कृतम्। | | | | |


*

*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*



## तृतीयः पाठः

# मम कक्ष्या



(अध्यापिका कक्ष्यां प्रविशति)

छात्राः (उत्थाय) - नमस्ते।<br>
अध्यापिका - नमस्ते, सुप्रभातम्। उपविशन्तु।<br>
रजनी (उत्थाय) - मम लेखनी न दृश्यते।<br>
अध्यापिका - कुत्र स्थापिता आसीत्?<br>
रजनी - मम स्यूते।<br>
अध्यापिका - सम्यक् पश्यतु।<br>
सुभाषः - दीर्घपीठिकायाः अधः काचित् लेखनी अस्ति।<br>
रजनी - आम्। सा मम लेखनी एव।<br>
अध्यापिका - छात्राः, स्ववस्तूनि सम्यक् परिपालयन्ताम्।

**पठनप्रवर्तनानि।**

❖ कक्ष्यायां कानि कानि वस्तूनि सन्ति? वदतु - लिखतु।

- **उच्चैः वाचयतु-**

  उत्पीठिकायाः उपरि पुस्तकानि सन्ति।<br>
  कक्ष्यायां द्वे दीर्घोत्पीठिके स्तः।<br>
  अध्यापिका अध्यापयति।


- **उत्तरं वदतु, लिखतु**

  पुस्तकानि कुत्र सन्ति? ......................................... ।<br>
  कक्ष्यायां कति दीर्घपीठिकाः सन्ति?<br>
  .....................................।

  अध्यापिका किं करोति? ......................................... ।



• वाताटानां सूत्राणि यथोचितं योजयतु।










❖ **आकारान्तस्त्रीलिङ्गरूपाणि परिचिनोतु।**

| एषा का ? | एते के ? | एताः काः ? |
|---|---|---|
| उत्पीठिका | उत्पीठिके | उत्पीठिकाः |
| दीर्घोत्पीठिका | दीर्घोत्पीठिके | दीर्घोत्पीठिकाः |
| अध्यापिका | अध्यापिके | अध्यापिकाः |


## किमधिगतम् ?

❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूच्यताम्)* |
|---|---|---|---|---|---|
| 1. | वस्तूनां नामानि कथितानि लिखितानि। | | | | |
| 2. | स्पष्टतया वाचितानि। | | | | |
| 3. | उत्तराणि कथितानि लिखितानि। | | | | |
| 4. | वाताटानां सूत्राणि योजितानि। | | | | |
| 5. | आकारान्तस्त्रीलिङ्ग-रूपाणि परिचितानि। | | | | |

*

*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*




## चतुर्थः पाठः

# शृणु मम वचनम्

चिक्रोड ! शृणु मम वचनं
गच्छसि शीघ्रं कुत्र सखे।
आम्रमशेषं पक्वं जातं
खादतु तुष्यतु सह मित्रैः।।

शुकपोतः खलु तव मित्रम्?
अतिमधुरा खलु शुकवाणी।
आम्रं खादतु गानं गायतु
खादतु तुष्यतु सह मित्रैः।।




## पठनप्रवर्तनानि

- गानम् एकैकशः संघशः च कक्ष्यायाम् आलपतु।
- उचितानि पदानि योजयतु।




........................ मृगराजः भवति।




........................ मधुरं गायति।



........................ आम्रं खादति।



........................ मन्दं चलति।



........................ क्षीरं पिबति।



## अकारान्तनपुंसकलिङ्गरूपाणि परिचिनोतु।

| एतत् किम् ? | एते के ? | एतानि कानि ? |
|---|---|---|
| पुस्तकम् | पुस्तके | पुस्तकानि |
| वनम् | वने | वनानि |
| फलम् | फले | फलानि |

## किमधिगतम् ?

❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूच्यताम्)* |
|---|---|---|---|---|---|
| 1. | गानम् आलपितम्। | | | | |
| 2. | वाक्यपूरणम् कृतम् | | | | |
| 3. | अकारान्तनपुंसकलिङ्ग-रूपाणि परिचितानि। | | | | |

*

*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*



पञ्चमः पाठः

# आपदि मित्रं मित्रम्।




एकः मूषकः वृक्षे सञ्चरति।
वृक्षस्य अधः एकः
सिंहः सुप्तः अस्ति ।




कष्टं ! मूषकः सिंहस्य उपरि पतति।

सिंहः क्रुद्धः भवति। मूषकः
क्षमां याचते। सिंहः मूषकं
मोचयति।







एकदा सिंहः जाले पतति।





सिंहः दीनदीनं विलपति।

मूषकः जालं दन्तैः कृन्तति।



सिंहः जालात् मुक्तः। सः मूषकं कृतज्ञतां प्रकाशयति। अत एव उच्यते 'आपदि मित्रं मित्रम्' इति।

## पठनप्रवर्तनानि

❖ **कोष्ठकात् अक्षराणि चित्वा जीविनां नामानि वदतु लिखतु।**

| | | |
|---|---|---|
| का | क्षः | ष |
| मू | वृ | सिं |
| हः | पि | कः |

.................... ....................

.................... ....................

❖ कोष्ठकात् पदानि स्वीकृत्य सिंहस्य मूषकस्य च भाषणं पूरयतु।
(विलपति, करिष्यामि, जाले)

सिंहः (विलपति) - रक्षतु माम्। रक्ष रक्ष।

मूषकः - कुतः दीनं दीनं ......................?

सिंहः - अहं .................... पतितः भवामि।

मूषकः - अहं साहाय्यं................।

❖ अधोदत्तानि अक्षराणि उपयुज्य दश पदानि लिखतु।

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| आ | अ | दी | स | हं | न्दः | धु | म | रम् | छु | पु |
| मा | न | स्त | पः | ष | च | कः | रि | चि | क्रो | पा |
| त्र | डः | म्रं | का | पी | छ | लि | तू | ति | पि | पे |
| मि | कम् | | | | | | | | | |

१. ........................ ६. ........................

२. ........................ ७. ........................

३. ........................ ८. ........................

४. ........................ ९. ........................

५. ........................ १०. ........................



❖ **कोष्ठकात् चित्रसाहाय्येन उचितं पदं योजयतु। (आकर्णयति, याचकः, चलति, विलपति, कर्तयति)**



माता शाकां .........।



बालः ........................।



...................... याचते।



बालिका गानं ...........।



बालः ........................।

## किमधिगतम् ?

❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूच्यताम्)* |
|---|---|---|---|---|---|
| 1. | जीविनां नामानि लिखितानि। | | | | |
| 2. | संम्भाषणपूरणं कृतम्। | | | | |
| 3. | दश पदानि लिखितानि। | | | | |
| 4. | उचितं पदं योजितम्। | | | | |

** (१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*



## षष्ठः पाठः

# मधुरं गणयामः

नीरजः - मातः! कदा विनोदयात्रार्थं गच्छामः?

माता - क्रिस्तुमस् विरामकाले गच्छामः।

नीरजः - विंशति दिनाङ्कपर्यन्तं परीक्षा भवति।

माता - परीक्षा कदा आरभ्यते?

नीरजः - दशमदिनाङ्के बुधवासरे।

माता - क्रिस्तुमस् कस्मिन् वासरे?

नीरजः - न जानामि।

माता - दिनदर्शिकां पश्यतु।

| December - 2014 | | | | | | |
|---|---|---|---|---|---|---|
| M | T | W | Th | Fr | Sa | Su |
| 1 | 2 | 3 | 4 | 5 | 6 | 7 |
| 8 | 9 | 10 | 11 | 12 | 13 | 14 |
| 15 | 16 | 17 | 18 | 19 | 20 | 21 |
| 22 | 23 | 24 | 25 | 26 | 27 | 28 |
| 29 | 30 | 31 | | | | |

नीरजः - (दिनदर्शिकां विलोक्य) क्रिस्तुमस् गुरुवासरे।

माता - आम् सम्यक्। परीक्षार्थं पठतु। परीक्षानन्तरं विनोदयात्रार्थं गच्छामः।



## पठनप्रवर्तनानि

❖ संख्यां पठित्वा विंशतिपर्यन्तं संख्याः दिनदर्शिकां दृष्ट्वा उच्चैः वदतु।

१ एकम् 

२ द्वे 


३ त्रीणि 

४ चत्वारि 

५ पञ्च 

६ षट् 

७ सप्त 

८ अष्ट 

९ नव 

१० दश 

१ १ एकादश

१ २ द्वादश

१ ३ त्रयोदश

१ ४ चतुर्दश

१ ५ पञ्चदश

१ ६ षोडश

१ ७ सप्तदश

१ ८ अष्टादश

१ ९ नवदश(एकोनविंशतिः)

२ ० विंशतिः

३ ० त्रिंशत्

४ ० चत्वारिंशत्

५ ० पञ्चाशत्

६ ० षष्टिः

७ ० सप्ततिः

८ ० अशीतिः

९ ० नवतिः

१ ० ० शतम्



❖ कक्ष्यायां छात्राणां संख्यां गणयतु।


❖ गणनक्रीडां कक्ष्यायां चालयतु।

❖ कोष्ठे दत्ताः संख्याः यथाक्रमं योजयतु।

| | | | | |
|---|---|---|---|---|
| २९ | २६ | २३ | २१ | २८ |
| २७ | २४ | २२ | ३० | २५ |

| | | | | |
|---|---|---|---|---|
| | | | | |
| | | | | |

❖ संख्याः योजयित्वा निलीनः कः इति पश्यतु। उचितवर्णैः लिम्पतु।



## किमधिगतम् ?

❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूच्यताम्)* |
|---|---|---|---|---|---|
| 1. | सख्यावाचकशब्दाःकथिताः लिखिताः च। | | | | |
| 2. | छात्रसंख्यागणनं कृतम्। | | | | |
| 3. | गणनक्रीडायां भागं गृहीतम्। | | | | |
| 4. | यथाक्रमं योजनं कृतम्। | | | | |
| 5. | संख्यायाः योजनं कृतम् निलीनः कः इति अवगतम्। | | | | |


*

*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*



## सप्तमः पाठः

# राष्ट्रपिता



गान्धीमहाभागः अस्माकं राष्ट्रपिता। सः गुजरात् राज्ये पोर्बन्दर् नगरे जातः। अस्य पूर्णं नाम मोहनदास् कर्मचन्द्र गान्धी इति। अस्य जन्मदिनं ओक्टोबर् २ गान्धिजयन्ती इति नाम्ना जनः आचरति। अधुना गान्धिजयन्तीवाराघोषः सर्वत्र प्रचलति। तत्र शुचित्वकर्मणि प्रामुख्यम् अस्ति।

### पठनप्रवर्तनानि

- पाठं पठित्वा गान्धिमधिकृत्य वदतु - लिखतु।
- विद्यालये गान्धिजयन्तीवाराचरणकार्यक्रमाः अधोदत्ताः। तान् पठतु। एवं संस्कृतवाराचरणस्य पट्टिकां रचयतु।

| | | |
|---|---|---|
| सोमवारः | - | उद्घाटनम्, सन्देशयात्रा। |
| कुजवारः | - | कक्ष्याशुचीकरणम्। |
| बुधवारः | - | विद्यालयपरिसरशुचीकरणम्। |
| गुरुवारः | - | ग्रामीणग्रन्थशालाशुचीकरणम्। |
| शुक्रवारः | - | गान्धिमहाभागस्य जीवनसम्बन्धि चित्रप्रदर्शनम्। |
| शनिवारः | - | मनोरञ्जककार्यक्रमाः। |
| रविवारः | - | संगोष्ठिः समापनञ्च। |

❖ वासरगानम् आलपतु।

सप्तवाराः सप्ताहे
तेषां नामान्युच्यन्ते
प्रथमोवारो रविवारः
सोमवारो द्वितीयतः
कुजवारो हि तृतीयतः
चतुर्थवारो बुधवारः
पञ्चमवारो गुरुवारः
शुक्रवारो षष्ठश्च
शनिवारस्तु सप्तमः
नामान्येवं वाराणाम्।

## किमधिगतम् ?

❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूच्यताम्)* |
|---|---|---|---|---|---|
| 1. | गान्धिमधिकृत्य कथितं लिखितं च। | | | | |
| 2. | पट्टिका निर्मिता। | | | | |
| 3. | वासरगानम् आलपितम्। | | | | |

*

*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*






अष्टमः पाठः

# हे मधुपसखे !

मधुपसखे! हे मधुपसखे!
उद्यानेऽस्मिन् क्रीडामः
नागच्छामि नागच्छामि
मधुपानार्थं गच्छामि।।

शुकपोत! हे शुकपोत!
उद्यानेऽस्मिन् क्रीडामः।
नागच्छामि लघुभिः काष्ठैः
नीडं कर्तुं गच्छामि।।



रे रे शुनक! रे शुनक!
उद्यानेऽस्मिन् क्रीडामः।
नागच्छामि गृहनाथस्य
सेवां कर्तुं गच्छामि।।

बालकवाक्यं विगणय्य
गतवन्तस्ते कार्यार्थम्।
लज्जानम्रो बालोऽयं
गच्छति शालाम् अतिशीघ्रम्।।

## पठनप्रवर्तनानि

- मधुपस्य, शुकस्य,शुनकस्य,बालस्य च भागं गृहीत्वा गीतकं कक्ष्यायाम् अवतारयतु।
- रिक्तस्थानानि पद्यात् चित्वा पूरयतु।

मधुपसखे! हे मधुपसखे!
उद्यानेऽस्मिन् क्रीडामः।
...........................
मधुपानार्थं गच्छामि।।



शुकपोत! हे शुकपोत!
उद्यानेऽस्मिन् क्रीडामः।
नागच्छामि लघुभिः काष्ठैः
.............................।।





..........................
उद्यानेऽस्मिन् क्रीडामः।
नागच्छामि गृहनाथस्य
सेवां कर्तुं गच्छामि।।

## किमधिगतम् ?

❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूच्यताम्)* |
|---|---|---|---|---|---|
| 1. | गीतं साभिनयम् अवतारितम्। | | | | |
| 2. | कविता पूरिता। | | | | |

*

*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*




## नवमः पाठः

# सुभाषितानि।

(१) विद्वत्वं च नृपत्वं च
नैव तुल्यं कदाचन।
स्वदेशे पूज्यते राजा
विद्वान् सर्वत्र पूज्यते।।

(२) यथा चित्तं तथा वाचः
यथा वाचः तथा क्रियाः।
चित्ते वाचि क्रियायां च
साधूनाम् एकरूपता।।



(३) विदेशेषु धनं विद्या
व्यसनेषु धनं मतिः।
परलोके धनं धर्मः
शीलं सर्वत्र वै धनम्।।

(४) क्षमा बलम् अशक्तानाम्
शक्तानां भूषणं क्षमा।
क्षमा वशीकृतिः लोके
क्षमया किं न सिद्ध्यति।।

## पठनप्रवर्तनानि

- सुभाषितानि संघशः एकैकशश्च कक्ष्यायामालपतु।
- सुभाषितालपनकेलिं कक्ष्यायां सञ्चालयतु।
- सुभाषितेभ्यः कैरलीपदानां पट्टिकां करोतु।

## किमधिगतम् ?

❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।**


| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूच्यताम्)* |
|---|---|---|---|---|---|
| 1. | सुभाषितानि आलपितानि। | | | | |
| 2. | सुभाषितालपनकेलिः चालिता। | | | | |
| 3. | पदानां पट्टिका कृता। | | | | |

*

*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*

दशमः पाठः

# मूढः शुनकः।





एकः शुनकः मार्गेण गच्छति।

मार्गे एकम् अस्थिखण्डं पश्यति।



अस्थिखण्डम् आदाय धावति।



सेतुमार्गेण याति।




जले स्वच्छायां पश्यति। छायाम् अपरं शुनकं मन्यते।



कोपेन भषति।

अस्थिखण्डं जले पतति।



शुनकः अधोमुखः तिष्ठति।

अत उच्यते "**अविचार्य न कर्तव्यम्**

**कर्तव्यं सुविचारितम्**।" इति

## पठनप्रवर्तनानि

- ❖ **कथां श्रुत्वा वदतु - लिखतु।**
- ❖ **कोष्ठकात् उचितं पदं स्वीकृत्य कथांशं पूरयतु।**

(पिपीलिका, जले, विलपति, कपोतः, पत्रं, तीरं)

काचन ................वापीतीरेण गच्छति। वातेन ......... पततिा प्राणरक्षार्थं ................। कश्चन ......................... तां पश्यति। रक्षार्थं .............. जले निक्षिपति। पिपीलिका पत्रम् आरुह्य .................... गच्छति।

## किमधिगतम् ?

❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूच्यताम्)* |
|---|---|---|---|---|---|
| 1. | कथा उक्ता लिखिता। | | | | |
| 2. | कथा पूरिता। | | | | |

*


*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*

## एकादशः पाठः

# गीतामृतम् ।

(१) पत्रं पुष्पं फलं तोयं
यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतम्
अश्नामि प्रयतात्मना।।

(२) विद्याविनयसम्पन्ने
ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च
पण्डितास्समदर्शिनः।।




(३) ध्यायतो विषयान् पुंसः
सङ्गस्तेषूपजायते।
सङ्गात् सञ्जायते कामः
कामात् क्रोधोऽभिजायते।।

(४) क्रोधात् भवति सम्मोहः
सम्मोहात् स्मृतिविभ्रमः।
स्मृतिभ्रंशात् बुद्धिनाशो
बुद्धिनाशात् प्रणश्यति।।

## पठनप्रवर्तनानि

- श्लोकं सङ्घशः एकैकशश्च कक्ष्यायाम् आलपतु।
- श्लोकालपनकेलिं कक्ष्यायां सञ्चालयतु।



## किमधिगतम् ?

❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् (संख्यया सूच्यताम्)* |
|---|---|---|---|---|---|
| 1. | श्लोकाः आलपिताः। | | | | |
| 2. | श्लोकालपनकेलिः चालिता। | | | | |

*

*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*

# अनुबन्धः

## शब्दकोशः

| पदम् | कैरली | कन्नटम् | आङ्गलम् |
|---|---|---|---|
| सुवर्णम् | സ്വർണ്ണം | ಚಿನ್ನ | gold |
| विलसति | ശോഭിക്കുന്നു | ಶೋಭಿಸುತ್ತದೆ | shines |
| परितः | ചുറ്റും | ಸುತ್ತಲೂ | around |
| गगने | ആകാശത്തിൽ | ಆಕಾಶದಲ್ಲಿ | in the sky |
| गलिताः | എറിയപ്പെട്ട | ಉದುರಿದ | thrown |
| भाति | ശോഭിക്കുന്നു | ಶೋಭಿಸುತ್ತದೆ | shines |
| तारकनिकरः | നക്ഷത്രക്കൂട്ടം | ನಕ್ಷತಗಳ ಗುಂಪು | group of stars |
| मधुपः | വണ്ട് | ದುಂಬಿಯು | black beetle |
| उद्यानम् | പൂന്തോട്ടം | ಹೂದೋಟ | garden |
| मधुपानार्थम् | തേൻകുടിക്കുവാൻ | ಜೇನುಕುಡಿಯಲು | For drinking honey |
| शुकपोतः | തത്തക്കുഞ്ഞ് | ಗಿಳಿಯ ಮರಿ | the little one of a parrot |
| गच्छामि | പോകുന്നു | ಹೋಗುತ್ತೇನೆ | goes |
| नीडम् | പക്ഷിക്കൂട് | ಗೂಡು | nest |



| | | | |
|---|---|---|---|
| शुनकः | നായ | ನಾಯಿ | dog |
| विगणय्य | അവഗണിച്ച് | ಕಡೆಗಣಿಸಿ | ignored |
| गतवन्तः | പോയവർ | ಹೋದರು | those who gone |
| ते | അവർ | ಅವರು | they |
| शाला | വിദ്യാലയം | ಶಾಲೆ | school |
| शाकाः | പച്ചക്കറികൾ | ತರಕಾರಿಗಳು | Vegetables |
| गृहम् | വീട് | ಮನೆ | house |
| आसन्दः | കസേര | ಕುರ್ಚಿ | chair |
| चषकः | കപ്പ് | ಗ್ಲಾಸು | Tumbler |
| दीपः | വിളക്ക് | ದೀಪ,ಬೆಳಕು | lamp |
| दीर्घोत्पीठिका | ഡസ്ക് | ಡೆಸ್ಕು | desk |
| कपाटिका | അലമാര | ಕಪಾಟು | cup board |
| छुरिका | കത്തി | ಚೂರಿ | knife |
| व्यजनम् | പങ്ക | ಬೀಸಣಿಗೆ | fan |
| दूरदर्शनम् | ദൂരദർശനം | ದೂರದರ್ಶನ | television |
| वाताटः | പട്ടം | ಗಾಳಿಪಟ | kite |
| पीठः | പീഠം | ಮಣೆ | stool |
| अग्निपेटिका | തീപ്പെട്ടി | ಬೆಂಕಿಪೆಟ್ಟಿಗೆ | matchbox |



| | | | |
|---|---|---|---|
| शय्या | കിടക്ക | ಹಾಸಿಗೆ | bed |
| गोलदीपः | ബൾബ് | ಬಲ್ಬು | bulb |
| खादतु | തിന്നൂ | ತಿನ್ನು | eat |
| तुष्यतु | സന്തോഷിക്കു | ಸಂತೋಷಗೊಳ್ಳು | to be happy |
| चिक्रोडः | അണ്ണാറക്കണ്ണൻ | ಅಳಿಲು | squirrel |
| कुत्र | എവിടെ | ಎಲ್ಲಿ | where |
| मित्रम् | സുഹൃത്ത് | ಗೆಳೆಯ | friend |
| तव | നിന്റെ | ನಿನ್ನ | your’s |
| वाणी | വചനം | ಮಾತು | word |
| स्यूतः | സഞ്ചി | ಚೀಲ | bag |
| छात्रः | വിദ്യാർഥി | ವಿದ್ಯಾರ್ಥಿ | student |
| तूलिका | പേന | ಪೆನ್ನು | pen |
| मापिका | സ്കെയിൽ | ಅಡಿಕೋಲು | scale |
| पेटिका | പെട്ടി | ಪೆಟ್ಟಿಗೆ | box |
| श्यामफलकम् | ബ്ളാക്ക് ബോർഡ് | ಕರಿಹಲಗೆ | black board |
| मानचित्रम् | ഭൂപടം | ಭೂಪಟ | map |
| मूषकः | എലി | ಇಲಿ | rat |
| सञ्चरति | നടക്കുന്നു | ಸಂಚರಿಸುತ್ತಾನೆ/ಳೆ | walks |

| | | | |
|---|---|---|---|
| स्वपिति | ഉറങ്ങുന്നു | ನಿದ್ರಿಸುತ್ತಾನೆ/ಳೆ | sleeps |
| उपरि | മുകളിൽ | ಮೇಲೆ | above |
| क्रुद्धः | കുപിതൻ | ಕೋಪಗೊಂಡ | one who is angry |
| जालम् | വല | ಬಲೆ | net |
| विलपति | കരയുന്നു | ಅಳುತ್ತಾನೆ/ಳೆ | cries |
| कृन्तति | മുറിക്കുന്നു | ಕತ್ತರಿಸುತ್ತದೆ | cuts |
| याचते | യാചിക്കുന്നു | ಬೇಡುತ್ತಾನೆ | begs |
| चलति | ചലിക്കുന്നു | ನಡೆಯುತ್ತಾನೆ/ಳೆ | moves |
| पिपीलिका | ഉറുമ്പ് | ಇರುವೆ | ant |
| सम्यक् | നന്നായിട്ട് | ಚೆನ್ನಾಗಿ | in a good way |
| सप्ताहः | ആഴ്ച(ഏഴുദിവസം) | ವಾರ (ಏಳು ದಿನಗಳು) | a week |
| सर्वत्र | എല്ലായിടത്തും | ಎಲ್ಲಾ ಕಡೆ | every where |
| पश्यति | കാണുന്നു | ನೋಡುತ್ತಾನೆ | see |
| पूज्यते | പൂജിക്കപ്പെടുന്നു | ಪೂಜಿಸಲ್ಪಡುತ್ತಾನೆ | worshiped |
| चित्तम् | മനസ് | ಮನಸ್ಸು | mind |
| क्रिया | പ്രവർത്തനം | ಕೆಲಸ | work |
| एकरूपता | ഐകരൂപ്യം | ಏಕರೂಪತೆ | uniformity |
| यथा | യാതൊരുപ്രകാരം | ಹೇಗೋ | in which manner |



| | | | |
|---|---|---|---|
| तथा | അപ്രകാരം | ಹಾಗೆ | thus |
| साधुः | സജ്ജനം | ಸಜ್ಜನ | good people |
| धनम् | സമ്പത്ത് | ಹಣ | wealth |
| व्यसनम् | ദു:ഖം | ದುಃಖ | sadness |
| मतिः | ബുദ്ധി | ಬುದ್ಧಿ | intelligence |
| परलोके | പരലോകത്തിൽ | ಪರಲೋಕದಲ್ಲಿ | in the other world |
| धर्मः | ധർമ്മം | ಧರ್ಮವು | duty |
| शीलम् | സ്വഭാവം | ನಡತೆ | character |
| भूषणम् | അലങ്കാരം | ಅಲಂಕಾರ | ornament |
| मार्गेण | വഴിയിലൂടെ | ದಾರಿಯಿಂದ | along the way |
| आदाय | എടുത്തിട്ട് | ತೆಗೆದುಕೊಂಡು | being taken |
| सेतुः | പാലം | ಸೇತುವೆ | bridge |
| छाया | നിഴൽ | ನೆರಳು | shadow |
| भषति | കുരയ്ക്കുന്നു | ಬೊಗಳುತ್ತದೆ | barks |
| पतति | വീഴുന്നു | ಬೀಳುತ್ತದೆ | falls |
| पत्रम् | ഇല | ಎಲೆ | leaf |
| तोयम् | വെള്ളം | ನೀರು | water |
| प्रयच्छति | നൽകുന്നു | ಕೊಡುತ್ತಾನೆ | gives |



| | | | |
|---|---|---|---|
| उपहृतम् | സമ്മാനിക്കപ്പെട്ടത് | ಸಮ್ಮಾನಿಸಲ್ಪಟ್ಟ | presented |
| अश्नामि | കഴിക്കുന്നു | ಉಣ್ಣುತ್ತೇನೆ | eats |
| प्रयतात्मना | മനസിനെ നിയന്ത്രിച്ചവനാൽ | ಮನೋನಿಗ್ರಹಿಯು | one who controls the mind |
| श्वपाकः | ചണ്ഡാലൻ | ಚಂಡಾಲ | a caste |
| पण्डिताः | പണ്ഡിതന്മാർ | ಪಂಡಿತರು | scholars |
| अध्यापयति | പഠിപ്പിക്കുന്നു | ಪಾಠಮಾಡುತ್ತಾನೆ/ಳೆ | teaches |
| मन्यते | കരുതുന്നു | ತಿಳಿಯುತ್ತಾನೆ | thinks |
| आकर्णयन्ति | കേൾക്കുന്നു | ಕೇಳಿಸಿಕೊಳ್ಳುತ್ತಾರೆ | hears |
| हस्ती | ആന | ಆನೆ | elephant |
| गवि | മൃഗങ്ങളിൽ | ದನದಲ್ಲಿ | in animals |
| पश्यतु | കാണൂ | ನೋಟು | see |
| अयम् | ഇവൻ | ಇವನ್ನು | this one |
| वनमार्गेण | കാട്ടിലൂടെ | ವನಮಾರ್ಗದಿಂದ | thorugh forest |
| गच्छति | പോകുന്നു | ಹೋಕುತಾನಂ | goes |
| मार्गमध्ये | വഴിമദ്ധ്യേ | ಮಾರ್ಗಮದ್ಯದಲಿ | on the way |
| भल्लूकः | കരടി | ಕರಟಿ | bear |
| मित्रम् | കൂട്ടുകാരൻ | ಗಳೇಯ | friend |
| उपेक्ष्य | ഉപേക്ഷിച്ചിട്ട് | ಉಪೇಷಿಸ್ಲಿ | having abandoned |



| | | | |
|---|---|---|---|
| वृक्षः | മരം | ಮರ | tree |
| भूमौ | ഭൂമിയിൽ | ಭೂಮಿಯಲ್ಲಿ | on earth |
| शेते | കിടന്നു | ಮಲಗುತ್ತಾನೇ | lies |
| जिघ्रति | മണക്കുന്നു | ಮುಸುತ್ತಾನೇ | smells |
| मत्वा | കണക്കാക്കിയിട്ട് | ತಿಳಿತು | having thought |
| त्यक्त्वा | ഉപേക്ഷിച്ചിട്ട് | ತ್ಯಜಿಸಿ | having abandoned |
| अवरुह्य | ഇറങ്ങിയിട്ട് | ಇಳಿತು | having unmounted |
| पृच्छति | ചോദിക്കുന്നു | ಪ್ರಶಿನಸುತ್ತಾನೇ | asks |
| अवदत् | പറഞ്ഞു | ಹೇಳಿದನು | said |
| आपदि | ആപത്കാലത്ത് | ಆಪತ್ತಿವಲ್ಲಿ | in crisis |
| कक्ष्या | ക്ലാസ്സ്മുറി | ತರಗತಿ | class |
| उपविशन्तु | ഇരുന്നാലും | ಕುಳಿತ್ತುಕೋಳ್ಳಿರಿ | sit |
| लेखनी | പേന | ಣಿವಿಣಪ್ಪಿ | Pen |
| परिपालयन्ताम् | സംരക്ഷിക്കൂ | ಸಲಹುತಿರುವರನ್ನು | Protect |
| दिनदर्शिका | കലണ്ടർ | ದಿನದರ್ಶಕೇ | calendar |
| विरामकाले | അവധിക്കാലത്ത് | ರಜಯೇನ್ತು | in holidays |
| अस्माकम् | നമ്മുടെ | ನಮ್ಮು | of us |



| | | | |
|---|---|---|---|
| सः | അവൻ | ಅವನು | he |
| जातः | ജനിച്ചു | ಡುಡ್ಡಿದನು | born |
| अस्य | ഇവന്റെ | ಇವನ | of his |
| अधुना | ഇപ്പോൾ | ಈಗಾ | now |
| प्रचलति | നടക്കുന്നു | ನಟೇಯುಕ್ತ್ತೇ | going on |
| प्रामुख्यम् | മുൻഗണന | ಪ್ರಾಮುಖ್ಯತೇ | preference |

